# इदमवधेयम्।

- प्रत्येकस्य प्रश्नस्य कः स्वभावः कः आशयः कथम् उत्तरं देयम् इत्येते विषयाः सम्यक् ज्ञापनीयाः छात्राः।
- खण्डिकालेखनं, लघूपन्यासः, आशयलेखनम् इत्यादिषु स्थानेषु प्रमुखानां पञ्चषाणां क्रियापदानां साहाय्येन छात्राः उत्तरं लेखितुम् अर्हन्ति।
  *(यच्छति, भवति/अस्ति, करोति, इच्छति, गच्छति, वर्तते)*
- सामान्यछात्राणां कृते *करोति,अस्ति* इति क्रियापदद्वयस्य साहाय्येन रचनापरिचयः दातुं शक्यते।
- सप्तककाराणाम् अभ्यासः सम्भाषणपूरणाय साहायकः भवति।
  *किम्, कुत्र, कति, कदा, कुतः, कथम्, किमर्थम्* इत्येतेषां परिशीलनसमये उत्तराणि दत्वा प्रश्ननिर्माणमिति क्रमः पाल्यते चेत् ललितया रीत्या परिशीलयितुं शक्यते।
  उदा - तत् पुष्पम्। (तत् **किम्**?)
  गीतायाम् अष्टादश अध्यायाः सन्ति। (गीतायां **कति** अध्यायाः सन्ति?)
  एवं प्रत्येकस्य प्रश्नस्य पञ्च पञ्च उदाहरणानि परिशील्यन्ते चेत् छात्राः संस्कृतेन आशयविनिमये समर्थाः भवेयुः।
- पाठस्थानाम् अव्ययानाम् (यदि - तर्हि, यथा - तथा, ..............) लेखनद्वारा परिशीलनं तथा बोधनाय सरलमार्गः च आश्रयणीयः।
  एतादृशानाम् अव्ययानां प्रयोगावसरे प्रायः प्रथमभागः (यदि, यथा) प्रारम्भे द्वितीयभागः (तथा, तर्हि) प्रथमवाक्यानन्तरं द्वितीयवाक्यस्य प्रारम्भे च भवति।
  उदा - [१]भवान् ददाति। [२]अहं नयामि।
  **यदि** भावान् ददाति **तर्हि** अहं नयामि।
- निर्दिष्टाशययुक्तश्लोकानाम् चयनाय प्रत्येकस्य श्लोकस्य मुख्यः आशयः बोधनीयः परिशीलनीयश्च।
- अत्र काश्चन सूचनाः एव दत्ताः। अस्माकं छात्रान् वयमेव जानीमः। तेषां स्तरवर्धनाय कीदृशाः अभ्यासाः करणीयाः इत्यपि जानीमः। तथापि सामूह्यमाध्यमानां साहाय्येन, आशयानां विनिमयेन च इतोऽप्यधिककार्याणि वयं कर्तुं शक्नुमः।

# उद्योगः कार्यसाधकः

**आमुखम्**

सोमदेवेन विरचितः उपदेशात्मकः कथाग्रन्थः भवति कथासरित्सागरः। तत्र कथापीठलम्बके वर्णिता मूषिकचरितनामिका प्रयत्नमहत्वप्रतिपादिका कथा अभित्तौ चित्रकर्म इति पाठरूपेण दत्ता अस्ति। छात्राणां कर्मकौशलं संवर्धयितुम् एषा कथा उपकरोति।

अभित्तौ चित्रकर्म।

**प्रवर्तनम् १**

**पाठं पठित्वा उद्योगी लभते श्रेयः इति विषयमधिकृत्य वैश्यपुत्रस्य कथामाधारीकृत्य चर्चां कुर्वन्तु। अस्मिन्कालेऽपि अस्याः कथायाः प्रसक्तिः विद्यते वा? कीदृशी ?**

***चर्चासूचिकाः -***

*वैश्यपुत्रस्य जननम्, बाल्यकालक्लेशाः, पठनसामर्थ्यम्, सामाजिकावस्था, विशाखिलसन्दर्शनम्, मृतमूषिकस्वीकारः, मूषिकविक्रयः, चणकविक्रयणम्, काष्ठवाणिज्यः, धान्यापणप्राप्तिः, धनसम्पादनम्, कृतज्ञताप्रकाशनम्, जीवनविजयाय कठिनप्रयत्नस्य आवश्यकता।*

अध्यापिका चर्चां क्रोडीकरोति - आलस्यं विना सोत्साहं यत्नः क्रियते चेत् सर्वैरपि विजयः प्राप्तुं शक्यते। अयमाशयः अनया कथया सूच्यते।

**प्रवर्तनम् २**

**प्रधानकर्म-अप्रधानकर्मणोः विवेचनम्(निर्धारणम्)**

उदा -

१. अम्बा गृहं जलम् आनयति।
   अम्बा **किम्** आनयति? जलम् - अतः जलं प्रधानकर्म। गृहम् - अप्रधानकर्म।

२. शिष्यः गुरुं सन्देहं पृच्छति।
   शिष्यः **कं** पृच्छति? सन्देहम्। सन्देहं - प्रधानकर्म। गुरुं - अप्रधानकर्म।

३. माता पुत्रीं विद्यालयं नयति।
   माता **कां** नयति? पुत्रीम्। अतः पुत्रीं प्रधानकर्म। विद्यालयम् अप्रधानकर्म।

४. पिता पुत्रं नगरं नयति।
   **कं** नयति? पुत्रम्। पुत्रं - प्रधानकर्म। नगरम् - अप्रधानकर्म।

(**കുറിപ്പ് :** കർമപദങ്ങൾ രണ്ടും ദ്വിതീയാവിഭക്തിയിലായിരിക്കെ ക്രിയയോട് ആരെ/എന്തിനെ എന്നു ചോദിക്കുമ്പോൾ കിട്ടുന്ന ഉത്തരമാണ് പ്രധാനകർമം. മറ്റൊരു തരത്തിൽ പറഞ്ഞാൽ ദ്വിതീയാ വിഭക്തിയുടെ അതിനെ എന്ന അർത്ഥം ഏതിനു സിദ്ധിക്കുന്നുവോ അതാണ് പ്രധാനകർമം. അതിനോട്, അതിലേക്ക് ഈ അർത്ഥം സിദ്ധിക്കുന്നവ അപ്രധാന കർമവുമായിരിക്കും.)

**अधोदत्तानि वाक्यानि पठित्वा प्रधानकर्म अप्रधानकर्म च विविच्य लिखत।**

१. यात्रिकः बालं मार्गं पृच्छति।
२. माता पुत्रं कथां वदति।
३. याचकः मातरं भिक्षां याचते।
४. बालिका विद्यालयं स्यूतं नयति।
५. आचार्यः शिष्यं प्रश्नं पृच्छति।
६. श्रीकृष्णः अर्जुनं गीतम् उपादिशत्।
७. अनुजः मां सत्यम् अवदत्।

**प्रवर्तनम् ४**

**वैश्यपुत्रस्य सुहृदः च सम्भाषणं पूरयत।**

| | | |
|---|---|---|
| सुहृत् | - | रे मित्र। भवान् ............... गच्छति? |
| वैश्यपुत्रः | - | अहं विशाखिलस्य गृहं .............। |
| सुहृत् | - | तव हस्ते .......... अस्ति? |
| वै. पु. | - | एषा मूषिकस्य सुवर्णप्रतिमा अस्ति। |
| सुहृत् | - | मूषिकप्रतिमा? एषा ...........? |
| वै. पु. | - | विशाखिलाय समर्पयितुम्। |
| सुहृत् | - | प्रतिमा .......... लब्धा? |
| वै. पु. | - | आपणात् क्रीता। |

**सप्तककाराणि**

किम् ?
कुत्र ?
कति ?
कुतः ?
कदा ?
कथं ?
किमर्थम् ?

# वृक्षरोपणविधयः

## आमुखम्

कृषिप्रधानं भवति अस्माकं राष्ट्रम्। वेदकालादारभ्य एव कृषिः पशुपालनं च भारतीयानाम् जीवने अवलम्बमासीत्। श्रीवराहमिहिराचार्येण विरचितायां बृहत्संहितायां वृक्षरोपणपालनविधयः समग्रतया प्रतिपाद्यन्ते।

## प्रवर्तनम् १

पाठं पठित्वा सूचनानुसारं वृक्षरोपणपालनविधिम् अधिकृत्य लघूपन्यासं रचयत।
सूचनाः - भारतं कृषिप्रधानं - बृहत्संहिता - वराहमिहिरः - वृक्षायुर्वेदः - वृक्षरोपणविधिः - सस्यक्षेत्रसज्जीकरणम् - आरामरोपणयोग्याः - अनूपे जायमानाः - सेकविधिः - देशान्तरनयनं - रोपणे कालनियमः - वृक्षयोः अन्तरं - सङ्करवृक्षाणाम् उत्पादनम् - रोगकारणानि - चिकित्सारीतिः।

## प्रवर्तनम् २

**टिप्पणिलेखनम्।**

कृषिः मानवजीवातुः - समर्थयत।
सूचनाः - राष्ट्रं कृषिप्रधानम् - आरोग्यपूर्णं जीवनम् - सर्वार्थसाधिका - जैवकृषिरीतिः।

## प्रवर्तनम् ३

**यथोचितं योजयत** -

| | | |
|---|---|---|
| वराहमिहिरः | - | चिकित्सा। |
| सायं प्रातश्च सेचनम् | - | रोगः। |
| आलावाले शुष्के सेचनम् | - | बृहत्संहिता। |
| पाण्डुपत्रता | - | ग्रीष्मकालः। |
| विडङ्गघृतमिश्रितम् | - | वर्षाकालः। |

# गीतामृतम्

**आमुखम्**

मानवजीवने धार्मिकमूल्यानाम् अत्युत्कृष्टं स्थानमस्ति। धार्मिकमूल्यानि उद्घोषयन्तः बहवः ग्रन्थाः संस्कृतसाहित्ये विद्यन्ते। तेषु अन्यतमा भवति श्रीमद्भगवद्गीता। महाभारतस्य भीष्मपर्वणि अन्तर्भूते अस्मिन् ग्रन्थे अष्टादश अध्यायाः सन्ति। मानवजीवनस्य नानाविधानां समस्यानां परिहारः भगवद्गीतायाम् अस्ति। गीतामृतं नामकेऽस्मिन् पाठे मनुष्याणां स्वभावजाः गुणाः, तेषां त्रैविध्यं, शारीरिकमानसिकव्यापारेषु तेषां स्वाधीनता चेत्यादिकं विव्रियते।

**प्रवर्तनम् १**

**अधोदत्तान् आशयान् पठित्वा पाठभागस्थश्लोकानुसारं क्रमीकुरुत।**

- राजसाहाराः दुःखशोकरोगजनकाः सन्ति।
- सत्वगुणयुक्ताः मानवाः देवान्, रजोगुणयुक्ताः यक्षरक्षांसि, तमोगुणयुक्ताः भूतप्रेतपिशाचादीन् च उपासते।
- प्राणिनां नैसर्गिकी श्रद्धा सत्वगुणोपेता रजोगुणोपेता तमोगुणोपेता इति त्रिप्रकारा भवति।
- तामसगुणयुक्ताः जनाः यामात्पूर्वं पक्वान् स्वादुरहितान् दुर्गन्धयुक्तान् अशुद्धान् च आहारान् इच्छन्ति।
- आहारः यज्ञः तपः दानं च त्रिधा भवति।
- सर्वेषां श्रद्धा स्वस्वसंस्कारमनुसृत्यैव प्रवर्तते।
- देवब्राह्मणाचार्यादीनां परिचरणं ब्रह्मचर्यं अहिंसा च कायिकं तपः उच्यते।
- सात्विकानां प्रियङ्कराः आहाराः आयुवर्धकाः हितकराः च भवन्ति।

**प्रवर्तनम् २**

**यथोचितं योजयत -**

| | | |
|---|---|---|
| भावसंशुद्धिः | - | तामसप्रियः। |
| वाङ्मयम् | - | कायिकं तपः। |
| सत्यकथनम् | - | मानसं तपः। |
| अहिंसा | - | राजसप्रियः। |
| उच्छिष्टः | - | वाचो विकारः। |
| कटुरसप्रधानाहारः | - | वाङ्मयं तपः। |

# अयुर्दानं महादानम्

## आमुखम्

भारतीयचिकित्सापद्धतिषु आयुर्वेदस्य सुप्रधानं स्थानमस्ति । प्रकृतिविभवानुपयुज्य सर्वचराचराणां हिताहितं सुखं दुःखं च परिगणय्य प्रचलिता इयं चिकित्सारीतिः देशेविदेशेषु प्रसिद्धा भवित। आयुर्वेदे वाग्भटविरचिताभ्यां अष्टाङ्गहृदयाष्टाङ्गसंग्रहाभ्यां आयुर्वेदस्य अष्टाङ्गत्वं प्रसिद्धमेव।

**प्रवर्तनम् १**

**अधोदत्तानि पदानि पट्टिकां कुरुत ।**

(कायचिकित्सा, कश्यपः, सर्वाङ्गसम्बन्धीनि, चरकसंहिता , ग्रहचिकित्सा, चरकः, बालचिकित्सा, कश्यपसंहिता, भूतविद्या, कौमारभृत्यम्, मातृशिशुसंरक्षणम्, मानसिकारोग्यसंरक्षणम्, शल्यचिकित्सा, शालाक्यतन्त्रम्, सुश्रुतः, नेत्रश्रोत्रनासिकादीनां, शस्त्रक्रियाप्रधानम्, आगदतन्त्रम्, वृषचिकित्सा, रसायनविद्या, सर्पकीटलूतवृश्चिकादीनां दंशने जायमानानां क्लेशानां दूरीकृरणाय, वाजीकरणतन्त्रम्, यौवनस्य बुद्धिमेधाधारणादिशक्तीनां पोषणम्, यौवन संरक्षणोपायः)

| अष्टाङ्गानि | चिकित्सा | अपरनाम | आचार्यः | ग्रन्थः |
|---|---|---|---|---|
| | | | | |

***प्रवर्त्तनम् २***

**यथोचितम् योजयत**

| | | |
|---|---|---|
| भारतीयचिकित्सापद्धतिः | - | शल्यचिकित्सा |
| रोगः | - | बालचिकित्सा |
| अरोगता | - | वाग्भटः |
| शस्त्रक्रियाप्रधानम् | - | आयुर्वेदः |
| अष्टाङ्गहृदयम् | - | भूतविद्या |
| मातृशिशुसंरक्षणम् | - | दोषवैषम्यम् |
| मानसिकारोग्यसंरक्षणम् | - | दोषसाम्यता |

# सुयोधनस्य राजनीतिः

**आमुखम्**

पञ्चमहाकाव्येषु अन्यतमं भवित भरविणाविरचितं किरातार्जुनीयम्। द्वैतवने पाण्डवान् प्रति वनेचरः सुयोधनशासनप्रकारान् विशदीकरोति। अयमेव पाठभागः।

**प्रवर्त्तनम् १**

**आधोदत्ताशययुक्तश्लोकान् चित्वा लिखतु।**

१) पराजयं विशङ्कमानः दुर्योधनः नयेन जगतीं जेतुम् इच्छति।

२) कुटिलमतिः दुर्योधनः स्वस्य यशः विस्तारयति।

३) कृतारिषड्वर्गजयेन , दिवं निशं च आलस्यं विना विभागं कृत्वा पौरुषं विस्तारयति।

४) भृत्यान् सखीन् इव, सखीन् बन्धुसमानान् , बन्धून् अधिकारिण इव सदा परिगणयति।

५) गुणान् समपक्षपातया विभागं कुतवान् । अतः गुणानुरागः मैत्रीभावे अभवत्।

६) एषः मम धर्मः न तु धनार्जनाय इति चिन्तया गुरूपदेशेन दण्डः सुतेषु शत्रुषु च समानरीत्या अकरोत्।

७) स्वकीयान् रक्षकान् परितः विन्यस्य शङ्कां विना गच्छति, सेवकेभ्यः स्वकृतज्ञता ं प्रकाशयति।

८) कर्षकेभ्यः सुखेन नदी जलं प्रदानं कृत्वैव कृषिं प्रोत्साहयति।

९) राजानः दुर्योधनशासनं माल्यमिव शिरोभिः वहन्ति।

विधाय रक्षान्परितः परेतरा-
नशङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः।।

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः।।

कृतारिषड्वर्गजयेन मानवी–
मगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंदिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम्।।

सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान्सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम्।।

असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवा-
न्न बाधतेऽस्य त्रिगणः परस्परम्।।

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन्भूतिमनार्यसंगमा-
द्वरं विरोधोऽपि समं महात्मभिः।।

न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम्।।

सुखेन लभ्या दधतः कृषीवलै-
रकृष्टपच्या इव सस्यसम्पदः।
वितन्वति क्षेममदेवमातृका-
श्चिराय तस्मिन्कुरवश्चकासति।।

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम्।।

*प्रवर्त्तनम् २*

**यथोचितं योजयत**

| | | |
|---|---|---|
| अर्थगौरवम् | - | इच्छति । |
| वंशस्थम् | - | ध्रियते । |
| समीहते | - | भारविः । |
| तनोति | - | उपगच्छति । |
| निहन्ति | - | विराजन्ते । |
| उपैति | - | विस्तारयति । |
| चकासति | - | निवारयन्ति । |
| उह्यते | - | जतौ जरौ । |

# केरलीयकलारूपाणि।

**प्रवर्तनम् १**

**तारतम्यविवेचनं टिप्पणीलेखनञ्च।**

| | | |
|---|---|---|
| | **साजात्यानि।** | |
| चाक्यार्कूत्त् | पाठकम् | हरिकथा |
| पुराणकथा। | पुराणकथा। | पुराणकथा। |
| समाजेधार्मिक - विचारोत्पादनम्। | समाजेधार्मिक - विचारोत्पादनम्। | समाजेधार्मिक- विचारोत्पादनम्। |
| चतुर्विधाभिनयप्रकाराः। | चतुर्विधाभिनयप्रकाराः। | चतुर्विधाभिनयप्रकाराः। |
| श्लोकालपनम्। | श्लोकालपनम्। | श्लोकालपनम्। |

| | | |
|---|---|---|
| | **वैजात्यानि** | |
| चाक्यार्कूत्त् | पाठकम् | हरिकथा |
| हास्यप्रधानम्। | भक्तिप्रधानम्। | लघुहास्यम्। |
| मिषाव्, नट्वाङ्गम् (वाद्योपकरणम्)। | नास्ति। | विविधवाद्योपकरणानि। |
| अङ्गुलीनिर्देशपूर्वकं उपहासं करोति। | ——— | ——— |

एतासां सूचनानां साहाय्येन प्रायः अत्रत्य उपन्यास-लघुटिप्पणीत्येतेषां प्रश्नानामुत्तरं लेखितुं शक्यते। आवश्यकं चेत् ***भवति मध्ये अपि किन्तु*** इत्येतेषां शब्दानां साहाय्येन सरलरीत्या

कर्तुं शक्यते।

## सुरायाः असुरता

**प्रवर्तनम् १**

अध्यापकः सुरायाः असुरता इति पाठभागस्य वाचनाय निर्दिशति। मद्यपानस्य दूष्यांशात् उद्बोधयितुं प्रयत्नः करणीयः। छात्रान् सङ्घीकृत्य बोधिसत्वस्य सर्वमित्रस्य च मिथः सम्भाषणस्य सम्भाव्य लेखनाय निर्दिशति। प्रश्नवाचकशब्दानां प्रयोगेण छात्राः सम्भाषणं रचयन्ति। ततः लिखितं सम्भाषणं परस्परं संशोधयति। सम्भाषणमध्ये कति प्रश्नवाचकशब्दाः उपयुज्यन्ते इति चर्चां कुर्वन्ति।

छात्राः परस्परं प्रश्नान् पृच्छन्ति। उत्तराणि वदन्ति च।

यथा -

श्रावस्ती नगरस्य राजा कः?

कः ब्राह्मणवेषं धृत्वा आविर्बभूव?

बोधिसत्वस्य हस्ते किम् आसीत्?

कुम्भे किम् आसीत्?

अस्य पानीयस्य नाम किम् आसीत्?

..........................................?

..........................................?

**पाठभागं पठित्वा सम्भाषणांशान् पूरयत।**

बोधिसत्वः - जयतु जयतु महाराजः।

सर्वमित्रः - भवान् ....................? भवतः हस्ते ................ अस्ति?

बोधिसत्वः - अहं ब्राह्मणः। मम हस्ते एकः विशिष्टः कुम्भः अस्ति।

सर्वमित्रः - ..........................?

बोधिसत्वः - कुम्भोऽस्मिन् तैलं वा घृतं वा न। इदं पानीयं पिबति चेत् मदोन्मत्तः भवेत्।

सर्वमित्रः - .........................?

बोधिसत्वः - अस्य पानीयस्य नाम मद्यम् इति।

सर्वमित्रः - तर्हि अद्य प्रभृति मद्यं न पिबेयुः।

बोधिसत्वः - .............................।

मातृकानुसारं अन्यप्रश्नवाचकशब्दानाम् अव्ययानां च प्रयोगाय छात्राः प्रेरयितव्याः।

# दिशानिर्णयः

**आमुखम्**

मनुष्यस्य परिस्थितेश्च मिथः बन्धनोपाधिः भवति वास्तुशास्त्रम्। गृहक्षेत्रादीनामाधारभूता भूमिः भवति वास्तु। भारतीयवास्तुशास्त्रमनुसृत्य शारीरिकमानसिकबौद्धिकमण्डलानां वास्तुं प्रति प्रभावः अस्ति। वास्तुशास्त्रे भूमिलक्षणं, भूपरीक्षा, दिङ्निर्णयः, शुभस्थानपरिग्रहः, गृहाणां रूपाणि, मानव्यवस्था इत्यादयः विषयाः प्रतिपाद्यन्ते। केरलेषु वास्तुशास्त्रं तच्चुशास्त्रमिति व्यवह्रियते। श्रीमङ्गलं श्रीनीलकण्ठमूसत् महाशयेन विरचिता मनुष्यालयचन्द्रिका एतद्विषये प्रसिद्धः ग्रन्थः भवति। दिङ्निर्णयरीतिः अस्मिन्नेकके प्रतिपाद्यते।

**प्रवर्तनम् १**

**प्राचीनाः वास्तुशास्त्रमनुसृत्य दिशानिर्णयं कथं प्रयोगपथमानीतवन्तः इति पाठानुसारं विशदयत।**

सूचनाः -

भूमेः समीकरणम् - शङ्कुस्थापनम् - वृत्तरचना - छायाङ्कनम् - बिन्दुसंयोजनम् - ब्रह्मसूत्रम् (पूर्वपश्चिमरेखा) - वृत्तयुग्मरचना - यमसूत्रम् (उत्तरदक्षिणरेखा)।

# योगिनः सर्वसेवकाः

**प्रवर्त्तनम् -१**

**सूचनानुसारं जीवनचरितम् लिखतु ।**

| | | |
|---|---|---|
| नाम | - | तपोवनस्वामिः |
| पूर्वाश्रमनामः | - | सुब्रह्मण्यः |
| जन्मः | - | १८८९ |
| पिता | - | अच्युतन् नायर् |
| माता | - | कुञ्ञम्म |
| जन्मस्थनम् | - | पालक्काट् जिल्लायां मुटप्पल्लूर् ग्रामे |
| ग्रन्थाः | - | विष्णुयमकं, कैलैसयात्र, हिमगिरिविहरः, बदरीस्तोत्रम्, ईश्वरदर्शनम् । |
| मरणम् | - | १९५७ |

**प्रवर्त्तनम् -२**

**यथोजितम् योजयत ।**

| | | |
|---|---|---|
| कैलासयात्रा | - | सुब्रह्मण्यः |
| तपोवनस्वामी | - | सुरनदीहृदः |
| देशसेवकाः | - | तपेवनस्वामी |
| उपदेशः | - | वित्तपदादिसम्पादनविषयिका |
| आत्मशान्तिः | - | सन्यासिनः |
| पुरुषार्थाः | - | स्वानुभवमुखेन शास्त्रमुखेन च |

# उपन्यासलेखनम् ।

| |
|---|
| भवति , करोति, तनोति ,यच्छति, इच्छति, गच्छति,<br>सः, अस्य/ तस्य ,अतः, अनन्तरम् |

**उदाहरणम्**

किरातार्जुनीयम् - भारविः - महाभारतकथा -द्वैतवनं- सुयोधनशासनम् - पराजयं शङ्कितः - नयेन जगतीं जेतुं - शुभ्रं यशः - पौरुषं - भृत्याः सुहृदः - सुहृदयः बान्धवः - बान्धवाः अधिकारिणः इव- स्वकीयान् रक्षकान् परितः - गुरूपदेशेन दण्डम् - कृषिवलैः जलम् - राजानः शासनं माल्यमिव ।

किरातार्जुनीयमहाकाव्यं भारविणा विरचितं **भवति।** किरतार्जुनीयं महाभारतकथामाश्रित्य **भवति।** पाण्डवाः द्वैतवने वसन्ति। सुयोधनः राज्यशासनं **करोति।** पराजितं शङ्कितः **सः** नयेन जगतीं जेतुं **इच्छति।** तदर्थं शुभ्रं यशः **तनोति । सः** पौरुषं प्रसारयति। **अस्य** भृत्यान् सुहृदः, सखीन् बान्धवान् , बान्धवान् अधिकारिणः इव **भवति। सः** स्वकीयानां रक्षकाणां सहायेन शङ्कां विना **गच्छति।** गुरुपदेशेन दण्डं **करोति।** कृषीवलेभ्यः सुखेन जलं यच्छति। **अस्य** शासनं माल्यमिव शिरसि वहन्ति।

**१) व्यक्तिः व्यक्तिशः, स्वस्य कुटुम्बे समाजे च कथं भवेत् इति अधोदत्तसूचनानुसारं लिखतु ।**

तैत्तरीयोपनिषदि - शिक्षावल्लीनामकात् -सत्यं वद-धर्मं चर स्वाध्यान्माप्रमद-स्वजीवनाय धनार्जनम्- देवपितृकार्यः - माता पिता आचार्य अतिथीनां च देववत् - श्रद्धा - श्रिय - भिय - समाजे जनान् प्रत्यभिज्ञानं कृत्वा तथा प्रवृत्तिः।

**२ ) अधोदत्तसूचनानुसारं लहरिवर्जकं एकां लघुटिप्पणीं सुरायाः असुरता इति कथां आश्रित्य लिखतु।**

जातकमाला - आर्यशूरः - कुम्भजातकम् - सुरनाम व्याधः- लहरिपानीय आनयनं - सुहृदः वारुणाय दानम् - राजान् प्रजान् च - नाशोन्मुखम्- राज्यान्तरम् - श्रेयांसि अपहरति - श्रावस्तीनगरम् - बोधिसत्वः- ब्राह्मणवेषम् - मद्यपानस्य दोषान् - मद्यं न पेयम् इति उद्घोषणा - सर्वैः लहरिवर्जनम्।

**३) अधोदत्तसूचनानुसारं यागाश्वबन्धनम् नाम पाठभागं स्ववाक्यैः लिखतु ।**

उत्तररामचरितम् -भवभूतिः - श्रीरामस्य आश्वमेधयागं - चन्द्रकेतुर्नियुक्तः शतसंख्याकाः - वाल्मीकेः आश्रमप्रवेशः- वटवः - आश्चर्ये लवाह्वयनम् - अश्वस्य बन्धनम् - युद्धार्थं सन्नद्धता ।

# विग्रहाः/ एकपदलेखनम्

| | |
|---|---|
| सत्वस्य इयं - सात्विकी। | सत्वस्य इदं - सात्विकम्। |
| रजसः इयं - राजसी। | रजसः इदं - राजसम्। |
| तमसः इयं - तामसी। | तमसः इदं - तामसम्। |
| शरीरे भवं - शारीरम्। | जेतुम् इच्छा - जिगीषा। |
| मनसि भवं - मानसम्। | पातुम् इच्छा - पिपासा। |
| संग्रामे भवः - सांग्रामिकः। | ज्ञातुम् इच्छा - जिज्ञासा। |
| अन्यत् नाम - नामान्तरम्। | अन्यः ग्रामः - ग्रामान्तरम्। |
| अन्यत् वनम् - वनान्तरम्। | अन्यः देशः - देशान्तरम्। |
| अन्यत् राज्यम्- राज्यान्तरम्। | अन्या गतिः - गत्यन्तरम्। |
| अन्यत् शास्त्रम्-शास्त्रान्तरम्। | अन्या कक्ष्या - कक्ष्यान्तरम्। |

बालस्य संरक्षणम् - बालसंरक्षणम्।
यौवनस्य संरक्षणम् - यौवनसंरक्षणम्।
जलस्य संरक्षणम् - जलसंरक्षणम्।
शरीरस्य संरक्षणम् - शरीरसंरक्षणम्।

दीर्घा ग्रीवा यस्य सः दीर्घग्रीवः।

देवः माता येषां ते देवमातृकाः।
नदी माता येषां ते नदीमातृकाः।

माता देवः यस्य सः मातृदेवः।
पिता देवः यस्य सः पितृदेवः।
आचार्यः देवः यस्य सः आचार्यदेवः।
अतिथिः देवः यस्य सः अतिथिदेवः।

महान् च असौ राजा च महाराजः।
युवा च असौ राजा च युवराजः।
वृद्धः च असौ वानरः च वृद्धवानरः।
वृद्धः च असौ पण्डितः च वृद्धपण्डितः।

शुचेः भावः - शौचम्/शुचित्वम्।
ऋजोः भावः - आर्जवम्।
सुहृदः भावः - सौहृदम्।
सख्युः भावः - सख्यम्।

स्वभावात् जातः - स्वभावजः।
स्वभावात् जाता - स्वभावजा।
स्वभावात् जातम् - स्वभावजम्।
(जातः, जाता, जातम् - उदा- आत्मनः जातः आत्मजः, आत्मनः जाता आत्मजा,
पङ्कात् जातं पङ्कजम्)

पुरि शेते इति पुरुषः।
द्विः जायते इति द्विजः।
त्रयाणां गणः - त्रिगणः।
पुरे भवः - पौरः।
पातुं योग्यं - पानीयम्।
अह्नः अपरः - अपराह्नः।
अह्नः पूर्वम् - पूर्वाह्नः।

वाचो विकारः वाङ्मयम्।
मृदां विकारः मृण्मयम्।
चित्तस्य विकारः चिन्मयम्।

हिंसायाः अभावः - अहिंसा।
ज्ञानस्य अभावः - अज्ञानम्।

न इष्टम् - अनिष्टम्।
न हिंसा - अहिंसा।
न ऋतम् - अनृतम्।
न सत्यम् - असत्यम्।

ज्यया सह वर्तते इति सज्यम्।
कौतुकेन सह वर्तते इति सकौतुकम्।
गर्वेण सह वर्तते इति सगर्वम्।

मदेन उन्मत्तः - मदोन्मत्तः।
धनेन उन्मत्तः - धनोन्मत्तः।

## पदच्छेदः

मूषिकश्शेते - मूषिकः + शेते।
सुहृदश्च - सुहृदः + च।
प्रातश्च - प्रातः + च।
चिकित्साविधयश्च - चिकित्साविधयः + च।
वराकश्चरतु - वराकः + चरतु।
अरोगाश्च - अरोगाः + च।

विरचितोऽयम् - विरचितः + अयम्।
प्रथितोऽभूत् - प्रथितः + अभूत्।
नृपासनस्थोऽपि - नृपासनस्थः + अपि।
विरोधोऽपि - विरोधः + अपि।
प्रीतियुजोऽनुजीविनः - प्रीतियुजः + अनुजीविनः।
विस्मितोऽभवत् - विस्मितः + अभवत्।
सोऽपि - सः + अपि।

तैरेव - तैः + एव।
वृक्षयोर्मध्ये - वृक्षयोः + मध्ये।
बहिर्वा - बहिः + वा।
आलापैर्यूयम् - आलापैः + यूयम्।
भवद्भिरिति - भवद्भिः + इति।
शिशोरपि - शिशोः + अपि।
रीतिरत्र - रीतिः + अत्र।
सर्वैरपि - सर्वैः + अपि।
पञ्चभिरङ्गैः - पञ्चभिः + अङ्गैः।
मुनिरिव - मुनिः + इव।
स्वच्छन्दश्चरेत् - स्वच्छन्दः + चरेत्।

अस्माभिर्यत्र - अस्माभिः + यत्र।
उच्चैरवदत् - उच्चैः + अवदत्।
अमूल्यनिधिरिव - अमूल्यनिधिः + इव।

स एव - सः + एव।
स सन्ततम् - सः + सन्ततम्।
सात्त्विका देवान् - सात्त्विकाः + देवान्।
तामसा जनाः - तामसाः + जनाः।

तप उच्यते - तपः + उच्यते।
मातृदेवो भव - मातृदेवः + भव।
पितृदेवो भव - पितृदेवः + भव।
आचार्यदेवो भव - आचार्यदेवः + भव।

एष आदेशः - एषः + आदेशः।
एष उपदेशः - एषः + उपदेशः।

त्रिविधो भवति - त्रिविधः + भवति।
त्रयो दोषाः - त्रयः + दोषाः।
प्रामाणिको ग्रन्थः - प्रामाणिकः + ग्रन्थः।

आयुस्तस्य - आयुः + तस्य।
रोगस्तु - रोगः + तु।
खुरास्तस्य - खुराः + तस्य।

**अ/आ + इ - ए**

चेति - च + इति।
पताकेयम् - पताका + इयम्।
केयम् - का + इयम्।

इ उ ऋ लृ इत्येतेषां वर्णानां अचि परे यथाक्रमं य व र ल वर्णाः भवन्ति।

उदा - सन्त्येव - सन्ति + एव, अत्र पूर्वपदस्य अन्तिमवर्णः इकारः भवति। उत्तरपदस्य आद्यवर्णः एकारः च भवति। इकार-एकारयोः योगे इकारस्थाने यकारः भवति। सन्त् + य् + एव - सन्त्येव। पञ्च उदाहरणानि ।

सन्त्येव - सन्ति + एव।
इत्येवम् - इति + एवम्।
इत्येभिः - इति + एभिः।
गुहास्ववसन् - गुहासु + अवसन्। (उ + अ - व् + अ। उकारस्थाने वकारः)
उपकरोत्ययम् - उपकरोति + अयम्।
धूनोत्यजस्रम् - धूनोति + अजस्रम्।
इत्येव - इति + एव।
स्वस्त्यस्तु - स्वस्ति + अस्तु।
यान्यस्माकम् - यानि + अस्माकम्।
शास्त्रान्तरेष्विव - शास्त्रान्तरेषु + इव।
कुत्राप्यलभ्यमाना - कुत्रापि + अलभ्यमाना।
यान्यनवद्यानि - यानि + अनवद्यानि।

| | |
|---|---|
| चरेच्च | - चरेत् + च। |
| तच्च | - तत् + च। |
| एतच्छ्रुत्वा | - एतत् + श्रुत्वा। |
| वणिगस्ति | - वणिक् + अस्ति। |
| नगराद्बहिः | - नगरात् + बहिः। |
| गुणानुरागादिव | - गुणानुरागात् + इव। |

| | |
|---|---|
| अनेनापि | - अनेन + अपि। |
| भवन्तीति | - भवन्ति + इति। |
| शशीव | - शशी + इव। |
| एवास्य | - एव + अस्य। |
| अश्रद्धयाऽदेयम् | - अश्रद्धया + अदेयम्। |

| | |
|---|---|
| सुचिन्त्यैव | - सुचिन्त्य + एव। |
| स्थित्वैव | - स्थित्वा + एव |
| अश्रद्धयाऽदेयम् | - अश्रद्धया + अदेयम्। |
| कांस्कान् | - कान् + कान्। |

| | |
|---|---|
| यत्रोक्तम् | - यत्र + उक्तम्। |
| प्रसिद्धेऽस्मिन् | - प्रसिद्धे + अस्मिन्। |
| बाधतेऽस्य | - बाधते + अस्य। |
| सुतेऽपि | - सुते + अपि। |

| | |
|---|---|
| अष्टावङ्गानि | - अष्टौ + अङ्गानि। |
| सन्निधावेव | - सन्निधौ + एव। |
| तावन्ते | - तौ + अन्ते। |

**** *** *** *** ***